# देवदेवं भजे

रागम्: हिन्दोळम्     ताळम्: झम्प

(श्री अन्नमाचार्य विरचित)

## पल्लवि

देवदेवं भजे दिव्य प्रभावम्
रावणासुरवैरि रणपुङ्गवं रामम्

## चरणम्

राजवरशेखरं रविकुलसुधाकरम्

आजानुबाहू नीलाभ्रकायम्

राजारि कोदण्ड राजदीक्षा गुरुम्
राजीवलोचनं रामचन्द्रं रामम् ॥ १ ॥

पङ्कजासनविनुत परमनारायणम्

शङ्कराजित जनक चापदळनम्

लङ्काविशोषणं लालित विभीषणम्
वेङ्कटेशं साधु विभुधविनुतं रामम् ॥ २ ॥

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇